शब्देन तादृशप्रकृतिरेव बोध्यते । तथा च तादृश्यां तेजो-बन्नाभिमानिदेवतायां स्त्री । अजाशब्दोक्ता नानागुणाः सन्त्यस्य अच् । छागे तस्य नानावर्णत्वात्तथात्वम् । छाग्यां स्त्री जातित्वेऽपि अजादित्वात् टाप् । "अजागलस्तनच्छायेति" ज्योतिषम् । द्वादशधा विभक्तस्य राशिचक्रस्य मेषरूपे प्रथमे राशौ "जीवार्किभानुजेज्यानां क्षेत्राणि सुरजादयइति" ज्योतिषम् तस्य मेषरूपत्वेऽपि मेषस्य अजतुल्याजाधिष्ठितरूपाभ्यां तत्त्वम् । मेषे च अजेन ब्रह्मणा दृश्यतत्तभङ्गसमये मेषरूपधारणेन पलायमानत्वात् अजाधिष्ठितरूपवत्त्वात् मेषस्य उपचारात् अजत्वम् । मात्रिकधातौ पु० । जननशून्ये गगनादौ त्रि० । आत् विष्णोर्जायते इति । चन्द्रे कामे, च पु० । "चन्द्रमा मनसो जात इति" श्रुतौ विष्णोर्मनोजन्यत्वाच्चन्द्रस्य अजत्वम् ॥ कामस्य वासुदेवात् रुक्मिण्यां जातत्वं भागवते प्रसिद्धम् दशरथपितरि रघुराजपुत्रे रामचन्द्रस्य पितामहे सूर्य्यवंश्ये नृपभेदे च । तस्याजत्वञ्च अजरूपब्रह्मणो मुहूर्त्तजातत्वात् यथोक्तं रघौ "ब्राह्मे मुहूर्त्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् । अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकारेति" तच्चरितञ्च तत्रैव पञ्चमाद्यष्टमसर्गान्ते द्रष्टव्यम् । छागतुल्याकारवत्त्वात् औषधिविशेषे स्त्री । तल्लक्षणं "अजास्तनाभकन्दा तु सक्षीरा क्षुपरूपिणी । अजा महौषधी ज्ञेया शङ्खकुन्देन्दुपाण्डरेति" वैद्यकम् । ऋषिभेदे पु० । गर्गा० यञ् । आज्यः तदपत्ये । बहुषु लुक् । अजाः । नडा० फक् । आजायनः तद्गोत्रापत्ये । उपमानतया पूर्व्वनिर्द्देशे तदन्तपादस्य नान्त्यलोपः । अजपादः स्त्रियान्तु कुम्भप० ङीप् अन्त्यलोपः पदादेशश्च । अजपदीति भेदः । एकादशरुद्रमध्ये प्रथमे रुद्रे पु० । तद्विवरणम् अजैकपादशब्दे दृश्यम् ।

**अजकर्ण** पु० अजस्य कर्ण इव पर्णं यस्य । छागतुल्य लम्बायमानपत्रयुक्ते (साल) इति ख्याते वृक्षे मरिचवृक्षे च । ६त० छागकर्णे । [के-क । (साल) इति ख्याते वृक्षे ।

**अजकर्णक** पु० अजकर्ण इव कायति पत्रद्वारा प्रकाशते

**अजकव** अस्त्री० अजो विष्णुः को ब्रह्मा तौ वाति त्रिपुरासुरवधद्वारानेन वा+करणे क ६त० । शिवधनुषि । शिवो हि अनेनैव धनुषा त्रिपुरासुरस्य बधेन विष्णुं ब्रह्माणं च प्रीणितवान् इति तस्य धनुषोऽजकवत्वम् अजकौ अवतीति । अजकावमप्यत्र । "धनुष्यजगवं युग्यमजकावमजीकवमिति" शब्दार्णवः । अजकं छागं वाति प्रीणाति वा-क । (वावुइ इति) ख्याते वर्व्वरीवृक्षे पु० । तल्लक्षणे तस्य प्रीत्याधिक्यात्तथात्वम् ।

**अजका** स्त्री अजस्य विकारः अवयवः गलस्तनः पुरीषं वा कन् । अजागलस्थे स्तनाकारे मांसखण्डे, तत्पुरीषे च ।

**अजकाजात** पु० ५त० । अजकेव जातः । "अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छिलास्रः । विदार्य्य कृष्णं प्रचयोऽभ्युपैति तं चाजकाजातमिति व्यवस्येदिति" वैद्यकोक्ते रोगभेदे ।

**अजकाव** न० अजका अजागलस्तनइव वाति प्रकाशते वा-क । अजागलस्तनाकारकाष्ठावयवयुक्ते मैत्रावरुणे यज्ञीयपात्रभेदे, "अजकावं दुश्चर्मीकं तिरोदधे" इति वेदः । अजैव अजका तत्पुरीषं वा तद्वत् वाति प्रकाशते वा-क । अजकाजाताख्ये रोगभेदे पु० । शिवधनुषि न० ।

**अजक्षीर** न० अजायाः क्षीरं ६त० पुंवद्भावः । छागीस्तन्यदुग्धे "अजक्षीरेण पाचयेदिति" वैद्यकम् ।

**अजग** न० अजं विष्णुं गच्छति शरत्वेन गम-त । शिवधनुषि । अजेन ब्रह्मणा गम्यते गीयते वा कर्म्मणि गम-ड-गै-क वा । विष्णौ पु० । अजेन गच्छति, अजं छागंयज्ञाङ्गत्वेन वा गच्छति गम-ड । वह्नौ पु० । प्रज्ञा० स्वार्थे अण् आजगमपि शिवधनुषि "स्थाणोर्धनुष्याजगमित्यमरमाला ।

**अजगन्धा** स्त्री अजस्य गन्ध इव गन्धोऽस्याः । (वनजोयान) इति ख्यातायां वनयामान्याम् अजमोदायाम् ।

**अजगन्धिका** स्त्री अजस्य गन्ध इव गन्धो यस्याः ब० कप्, कापि अत इत्त्वम्, अजस्य गन्ध इव गन्धः अस्त्यस्य ठन् वा । (वावुइ इति) प्रसिद्धे वर्व्वरीशाके ।

**अजगन्धिनी** स्त्री अजस्य मेषस्य गन्धो लेशः एकदेशः शृङ्गमिति यावत् सोऽस्याः फलाकारेणास्तीति अजगन्ध+इनि ङीप् । (गाडरशिङ्गा) इति प्रसिद्धे अजशृङ्गीवृक्षे ।

**अजगर** पु० अजं छागं गिरति गिलति गृ-अच् । वृहत्सर्पे । अजगरं अगस्त्यशापात् वृहत्सर्पभावापन्नं नहुषमधिकृत्य कृतो ग्रन्थः अण् । आजगरम् अजगरकथायाम् न० । तच्च वनपर्व्वणि आजगरोपाख्यानरूपम् ।

**अजगव** पु० अजगो विष्णुः शरत्वेन त्रिपुरासुरबधकालेऽस्यास्ति अजग+अस्त्यर्थे व । शिवधनुषि "शिवोऽप्यजगवं चापं विधुन्वन् तरसा रणे" इति पुरा० । [शिवधनुषि ।

**अजगाव** पु० अजगं विष्णुमवति अव-अण् उप० स० ।

**अजघन्य** त्रि० न जघन्यः अधमः न०त० । अधमभिन्ने